## САНСКРИТСКІЯ ПИСЬМЕНА, на мѣру 8.

---

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः ।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥ १ ॥
न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत् ।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् ॥ २ ॥
द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम् ।
अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥ ३ ॥
अन्ये जायां परि मृशन्त्यस्य यस्यागृधद्वेदने वाज्यक्षः ।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम् ॥ ४ ॥
यदादीध्ये न दविषाण्येभिः परायद्भ्यो ऽव हीये सखिभ्यः ।
न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥ ५ ॥
सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा २ शूशुजानः ।
अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि ॥ ६ ॥
अक्षास इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा ॥ ७ ॥
त्रिपञ्चाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत्कृणोति ॥ ८ ॥
नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते ।
दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ॥ ९ ॥
जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानो ऽन्येषामस्तमुप नक्तमेति ॥ १० ॥
स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम् ।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरन्ते वृषलः पपाद ॥ ११ ॥

ТИПОГРАФІЯ И СЛОВОЛИТНЯ ИМПЕРАТОРСКОЙ АКАДЕМІИ НАУКЪ.

(1852)

Digitized by Google

## САНСКРИТСКІЯ ПИСЬМЕНА, на мѣру 10.

---

अथ कन्याप्रदाने स तं एवार्थं विचिन्तयन
समानिन्ये च तत् सर्वं भाण्डं वैवाहिकं नृपः
ततो वृद्धान् द्विजान् सर्वान् ऋत्विजः सपुरोहितान्
समाहूय दिने पुण्ये प्रययौ सह कन्यया
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः
पद्भ्यां एव द्विजैः सार्द्धं राजर्षिं तं उपागमत्
तत्रापश्यत् महात्मानं सालवृक्षं उपाश्रितं
कौश्यां वृष्यां समासीनं चक्षुर्हीनं नृपं तदा
स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः
वाचा सुनियतो भूत्वा चकारात्मनिवेदनं
तस्यार्घ्यं आसनं चैव गां चावेद्य स धर्मवित्
किं आगमनं इत्य् एव राजा राजानं अब्रवीत्
तस्य सर्वं अभिप्रायं इतिकर्तव्यतां च तां
सत्यवन्तं समुद्दिश्य सर्वं एव न्यवेदयत्

सावित्री नाम राजर्षे कन्येयं मम शोभना
तां स्वधर्मेण धर्मज्ञ स्नुषार्थे त्वं गृहाण मे

ТИПОГРАФІЯ И СЛОВОЛИТНЯ ИМПЕРАТОРСКОЙ АКАДЕМІИ НАУКЪ.

(1861.)

Digitized by Google